दैवकोविदा, स्त्री, ( दैवे दैवनिमित्तशुभाशुभज्ञाने कोविदा विज्ञा । ) दैवज्ञा । इति शब्दरत्नावली ॥ दैवपण्डिते, त्रि ॥

दैवज्ञः, त्रि, ( दैवं जानातीति । ज्ञा + कः । ) गणकः । इत्यमरः । २ । ८ । १४ ॥ ( यथा, देवीभागवते । १ । २० । ३४ ।
"दैवज्ञान् वेदविदुषः पर्य्यपृच्छच्छुभं दिनम् ॥")
अस्योत्पत्तिर्यथा, दैवज्ञाश्चधनापहारी धूमान्धनरकं भुक्त्वा शतजन्मव्यधिक-नानाविधपक्षिकृमिहस्तभार्यावंशहीनव्याधियुतशूवरस्वर्णकारसुवर्णवणिग्यवनसेविविप्रशापग्रणका भूत्वा दैवज्ञो गणनोपजीविविप्रो भवति ॥ * ॥
अपि च ।
"लाक्षालोहादिव्यापारी रसादिविक्रयी च यः ।
स याति नागवेष्टञ्च नागैर्वेष्टित एव च ॥
वसेत् स्वलोममानाब्दं तत्रैव नागदंशितः ।
ततो भवेत् स गणको वैद्यश्च सप्तजन्मसु ॥
गोपश्च चर्म्मकारश्च रङ्गकारस्ततः शुचिः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

दैवज्ञा, स्त्री, ( दैवं जानातीति । ज्ञा + कः । ततष्टाप् ।) दैवज्ञभार्य्या । प्रश्नादिना शुभाशुभज्ञा । लक्षणादिना शुभाशुभनिरूपिणी । तत्पर्य्यायः । विप्रश्निका २ ईक्षणिका ३ । इत्यमरः ।२।६।२०॥

दैवतः, पुं क्ली, (देवता एव । स्वार्थे अण् ।) देवता । इत्यमरः ।१।१।६॥ ( यथा, रामायणे । २ । ५० । २ ।
"आपृच्छे त्वां पुरिश्रेष्ठे ! काकुत्स्थपरिपालिते !।
दैवतानि च यानि त्वां पालयन्त्यावसन्ति च ॥"
देवतानां समूहः । देवता + अण् । ) देवतासमूहे, क्ली । ( देवताया इदम् । अण् । ) देवसम्बन्धिनि, त्रि ॥

दैवदीपः, पुं, (देवः सूर्य्याधिष्ठातृको दीपः । दर्शनेन्द्रियस्य सूर्य्याधिष्ठातृत्वात्तथात्वम् । ) चक्षुः । इति त्रिकाण्डशेषः ॥ देवसम्बन्धिप्रदीपश्च ॥

दैवपरः, त्रि, ( दैवमेव परं प्रधानं यस्य । ) दैवनिष्ठः । तत्पर्य्यायः । यदृविष्यः २ । इति हेमचन्द्रः । ३ । ४७ ॥ ( यथा, मार्कण्डेये ।४३।८६।
"नाहैं न वैलिभिः कुर्य्यान्न च न्यूनेन निन्दितैः ।
न सर्व्वशङ्किभिर्नित्यं न च दैवपरैर्नरैः ।
कुर्व्वीत साधुभिर्मैत्रीं सदाचारावलम्बिभिः ॥")

दैवप्रश्नः, पुं, ( दैवे दैवनिमित्तशुभाशुभविषये यः प्रश्नः ।) प्राक्तनशुभाशुभकर्म्मजिज्ञासा । तत्पर्य्यायः । उपश्रुतिः २ । इति त्रिकाण्डशेषः ॥ ( दैववाणी । यदुक्तं हारावल्याम् । २२ ।
"नक्तं निर्गत्य यत्किञ्चित् शुभाशुभकरं वचः ।
श्रूयते तद्विदुर्धीरा दैवप्रश्नमुपश्रुतिम् ॥" )

दैवयुगं, क्ली, ( दैवं देवसम्बन्धि युगम् । ) देवानां युगम् । तच्च दैवमानेन द्वादशसहस्रवर्षम् । मनुष्यपरिमाणेन चतुर्युगमानम् । इति शब्दार्थकल्पतरुः ॥ (यदुक्तं मनौ । १ । ७१ ।
"यदेतत् परिसंख्यातमादावेव चतुर्युगम् ।
एतद्द्वादशसाहस्रं देवानां युगमुच्यते ॥" )

दैवलकः, पुं, ( देवल इव कायतीति । कै + कः । ततः स्वार्थे अण् । ) भौतः । भूतसेवकः । इति हारावली । १५० ॥ देवलसम्बन्धिनि, त्रि ॥

दैवलेखकः, पुं, ( दैवं दैवनिमित्तशुभाशुभं लिखतीति । लिख + ण्वुल् । ) मौहूर्त्तः । गणकः । इति त्रिकाण्डशेषः ॥

दैववाणी, स्त्री, (दैवी आकाशसम्बन्धिनी वाणी ।) आकाशवाणी । अमानुषी वाक् । तत्पर्य्यायः । चित्तोक्तिः २ पुण्यशकटी ३ दैवप्रश्नः ४ उपश्रुतिः ५ । इति त्रिकाण्डशेषः ॥ संस्कृतवाक्यम् । यथा, दण्डी ।
"संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः ॥"
"गीर्वाणवाणीषु विशालबुद्धि-
संकीर्त्तनपुण्यभयं हि लोके ।
सुदुर्लभं तच्च न मुग्धबोधा-
न्न लभ्यतेऽतः पठनीयमेतत् ॥"
इति बोपदेवः ॥

दैवाकरिः, पुं, ( दिवाकरस्य अपत्यं पुमान् । दिवाकर + इञ् ।) शनिः । यमः । यमुनायां, स्त्री । एतेषामुदाहरणं यथा,—
"सम्प्रति दैवाकरितः मारभिताहरिताश्वकरितः ।
नायं कोऽपि विशेषः स्वाहितराशिवशात्तशुभेषः ॥"
इति काव्योदयधृतवङ्गीतकम् ॥

दैवात्, व, हठात् । यथा, "दैवादयाङ्गवलनं किल मानवत्याः ।" इति काव्योदयः ॥

दैवाहोरात्रः, पुं, ( दैवः देवसम्बन्धी अहोरात्रः । ) देवानामेकदिवसः । स मनुष्याणां संवत्सरः । इति शब्दार्थकल्पतरुः ॥

दैविकः, त्रि, ( देवस्य अयं दैवे भवो वा । देव + ठक् । ) देवसम्बन्धी । ( यथा, मनुः । १ । ६५ ।
"अहोरात्रे विभजते सूर्य्यो मानुषदैविके ।
रात्रिः स्वप्नाय भूतानां चेष्टायै कर्म्मणामहः ॥")
दैवे भवः । इति व्याकरणम् ॥

दैवी, स्त्री, ( देवस्य इयम् । देव + अण् अञ् वा । ततो ङीप् । ) देवसम्बन्धिनी । यथा,—
"अक्षीयास्वमिति स्फुरत्यपि हृदि व्यावर्त्तिका वासना
का नामेयमतर्क्यसेतुगहना दैवी सतां यातना ।"
इति शान्तिशतके । ७ ॥
चिकित्साविशेषः । यथा, वैद्यके ।
"आसुरी मानुषी दैवी चिकित्सा त्रिविधा मता ॥"

दैव्यं, क्ली, ( देवस्य इदम् । "देवाद्यञञौ ।" ४ । १ । ८५ । इत्यस्य वार्त्तिकोक्त्या यञ् । ) दैवम् । भाग्यम् । इत्यमरटीकायां भरतः ॥ ( देवसम्बद्धे, त्रि । यथा, ऋग्वेदे । २ । ३० । ११ ।
"तं वः शर्धं मारुतं सुम्नयुर्गिरोप ब्रुवे नमसा दैव्यं जनम् ॥" )

दैशिकं, त्रि, ( देशे भवं देशस्य इदं वा । देश + ठञ् । ) देशसम्बन्धि । भवार्थे ष्णिकप्रत्ययेन सिद्धम् । सम्बन्धविशेषः । यथा । कालभावयोः सप्तमीति सूत्रं भावः सत्त्वं तच्च द्विविधं कालिकं दैशिकञ्चेति कारकचक्रे भवानन्दसिद्धान्तवागीशः ॥ देशनिष्ठविशेषणता । इति नैयायिकाः ॥

दैष्टिकः, पुं, दिष्टेन भवः । ( दिष्ट + ठक् । ) भाग्याधीनजातः । कालेन जातः । इति व्याकरणम् ॥ ( दिष्टं भागधेयमिति मतिर्यस्य । "अस्ति नास्ति दिष्टं मतिः ।" । ४ । ४ । ६० । इति ठक् । दैवपरः । इति सिद्धान्तकौमुदी ॥ )

दैहिकं, त्रि, ( देहस्य इदं देहे भवं वा । देह + ठञ् । ) देहसम्बन्धि । यथा,—
"भीरूणां भैरवाणां भवति सुविहिता दैहिकी गोपितार्चा ।"
इति कूर्चिकातन्त्रेऽन्त्यर्याग: ॥

दो, य छेदे । इति कविकल्पद्रुमः ॥ (दिवां-परं-सकं-सेट् ।) य, शिरोऽवद्यति विद्विषां यः । इति दुर्गादासः ॥

दोः, [ स् ] पुं, ( दाम्यत्यनेनेति । दमु उपशमे + "दमेर्डोसिः ।" उणां २ । ६८ । इति डोसिः । ) बाहुः । इत्यमरः । २ । ६ । ८० ॥ ( यथा, अनर्घराघवे । २ । ४४ ।
"दासत्वेयमवश्यमेव दुहिता कस्येचिदेनामसौ
दोर्लीलामहतीकृतत्रिभुवनो लङ्कापतिर्याचते ॥")

दोःशिखरं, क्ली, ( दोष्णः शिखरम् । ) स्कन्धः । इति राजनिर्घण्टः ॥

दोःसहस्रभृत्, पुं, (दोःसहस्रं बाहुसहस्रं बिभर्त्तीति । भृ + क्विप् । ) कार्त्तवीर्य्यार्ज्जुनः । इति हेमचन्द्रः । ३ । ३६६ ॥ बाणराजा च ॥

दोग्धा, [ऋ] पुं, (दोग्धीति । दुह + तृच् ।) अर्थोपजीविकविः । वत्सः । गोपालः । इति मेदिनी । घे, ८ ॥ दोहनकर्त्तरि, त्रि ॥ (यथा, कुमारे ।१।२।
"यं सर्व्वशैलाः परिकल्प्य वत्सं
मेरौ स्थिते दोग्धरि दोहदक्षे ॥" )

दोग्ध्री, स्त्री, ( दोग्धृ + ङीप् । ) गौः । इति राजनिर्घण्टः ॥ ( यथा, रघुः । २ । २३ ।
"दोहावसाने पुनरेव दोग्ध्रीं
भेजे भुजोच्छिन्नरिपुर्निषण्णाम् ॥" )

दोदुल्यमानः, त्रि, (दुल + यङ् + शानच् । ) पुनःपुनरतिशयेन वा दोलनविशिष्टः । इति व्याकरणम् ॥

दोधः, पुं, ( दोग्धीति । दुह + अच् । निपातनात् साधुः । ) गोवत्सः । यथा,—
"देव सदोधकदम्बतलस्थ-
श्रीधर तारकनामपदं मे ।
कण्ठतलेऽसुविनिर्गमकाले
क्षणमपि चेन्नमेष्यति योगम् ॥"
इति छन्दोमञ्जरी ॥

दोधकः, पुं, छन्दोविशेषः । यथा, श्रुतबोधे ।
"आद्यचतुर्थमहीननितम्बे
सप्तमकं दशमञ्च तथान्त्यम् ।